# shrIshanirakShAstavaH

# શ્રીશનિરક્ષાસ્તવઃ

## Document Information

Text title : shanirakShAstavaH

File name : shanirakShAstava.itx

Category : navagraha, shani, stotra, raksha

Location : doc_z_misc_navagraha

Transliterated by : anonymous456an at gmail.com

Proofread by : anonymous456an at gmail.com

Latest update : June 16, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીશનિરક્ષાસ્તવઃ

॥ પૂર્વપીઠિકા ॥

શ્રીનારદ ઉવાચ ।
ધ્યાત્વા ગણપતિં રાજા ધર્મરાજો યુધિષ્ઠિરઃ ।
ધીરઃ શનૈશ્ચરસ્યેમં ચકાર સ્તવમુત્તમમ્ ॥

॥ મૂલપાઠઃ ॥

॥ વિનિયોગઃ ॥

ૐ અસ્ય શ્રીશનિસ્તવરાજસ્ય સિન્ધુદ્વીપ ઋષિઃ । ગાયત્રી છન્દઃ ।
શ્રીશનૈશ્ચર દેવતા । શ્રીશનૈશ્ચરપ્રીત્યર્થે પાઠે વિનિયોગઃ ॥

॥ ઋષ્યાદિન્યાસઃ ॥

શિરસિ સિન્ધુદ્વીપર્ષયે નમઃ । મુખે ગાયત્રીછન્દસે નમઃ ।
હૃદિ શ્રીશનૈશ્ચરદેવતાયૈ નમઃ ।
સર્વાઙ્ગે શ્રીશનૈશ્ચરપ્રીત્યર્થે વિનિયોગાય નમઃ ॥

॥ સ્તવઃ ॥

શિરો મે ભાસ્કરિઃ પાતુ ભાલં છાયાસુતોઽવતુ ।
કોટરાક્ષો દૃશૌ પાતુ શિખિકણ્ઠનિભઃ શ્રુતી ॥
ઘ્રાણં મે ભીષણઃ પાતુ મુખં બલિમુખોઽવતુ ।
સ્કન્ધૌ સંવર્તકઃ પાતુ ભુજૌ મે ભયદોઽવતુ ॥
સૌરિર્મે હૃદયં પાતુ નાભિં શનૈશ્ચરોઽવતુ ।
ગ્રહરાજઃ કટિં પાતુ સર્વતો રવિનન્દનઃ ॥
પાદૌ મન્દગતિઃ પાતુ કૃષ્ણઃ પાત્વખિલં વપુઃ ॥

॥ ફલશ્રુતિઃ ॥

રક્ષામેતાં પઠેન્નિત્યં સૌરેર્નામાબલૈર્યુતમ્ ।

સુખી પુત્રી ચિરાયુશ્ચ સ ભવેન્નાત્ર સંશયઃ ॥

॥ ઇતિ શ્રીશનિરક્ષાસ્તવઃ ॥

Encoded and proofread by anonymous456an at gmail.com

---

*shrIshanirakShAstavaH*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*